दशमः पाठः

# सामाजिकं समत्वम्

मनुष्यः सामाजिकः प्राणी वर्तते। समाजं विना मनुष्याणां जीवनं कठिनं भवति। एकं भवनं जनानां सहयोगेन निर्मितं भवति। केचन जनाः इष्टकानां निर्माणम् अकुर्वन्। केचन अस्य भवनस्य कपाट-गवाक्षयोः निर्माणम् अकुर्वन्। एवमेव सामाजिक-सहयोगेन एव अनेकानि वस्तूनि निर्मितानि भवन्ति।

अस्माकं देशे विविधाः जनाः वसन्ति। विविधान् धर्मान् ते आचरन्ति। किन्तु सर्वे भ्रातृभावेन निवसन्ति। वयं परस्परं सौहार्देन निवसामः। ईद-होलिका-क्रिसमस-प्रभृतीनाम् उत्सवानाम् अवसरेषु परस्परं सहयोगं कुर्मः।

केचन जनाः धर्मकारणात् विवादं कुर्वन्ति। ते स्वधर्मं श्रेष्ठं वदन्ति। परधर्मं हीनं गणयन्ति। वस्तुतः सर्वे धर्माः समानाः सन्ति।

एवमेव समाजे केचन संपन्नाः, केचन निर्धनाः सन्ति। सर्वे समाजस्य सदस्याः एव सन्ति। तेषु परस्परं समता भवेत्। यन्त्रस्य एकैकः खण्डः अनिवार्यः अस्ति। तथैव समाजस्य सर्वे जनाः अनिवार्याः सन्ति।

यदा भारतीयाः परस्परं सौहार्देन निवसेयुः, तदा भारतवर्षं विश्वस्य प्रबलं राष्ट्रं भवेत्।

## शब्दार्थः

| | | |
|---|---|---|
| समत्वम् | = | समता, एकता |
| इष्टकानाम् | = | ईंटों का |
| अकुर्वन् | = | किये |
| केचन | = | किन्हीं ने / कोई |
| अस्य | = | इसका / इसकी / इसके |
| भवनस्य | = | मकान के |
| कपाटः | = | किवाड़, दरवाजा |
| गवाक्षः | = | खिड़की |
| एवमेव | = | इसी प्रकार |

| | | |
|---|---|---|
| एव | = | ही |
| अस्माकम् | = | हमारा / हमारी / हमारे |
| जनाः | = | लोग |
| वसन्ति | = | बसते हैं |
| मन्यन्ते | = | मानते हैं |
| भ्रातृभावेन | = | भाईचारे के साथ / भाई-भाई की तरह |
| प्रभृतीनाम् | = | इत्यादि का |
| कुर्मः | = | (हम) करते हैं |
| स्वधर्मम् | = | अपने धर्म को |
| परधर्मम् | = | दूसरों के धर्म को |
| हीनम् | = | छोटा / तुच्छ |
| निर्धनाः | = | गरीब |
| तेषु | = | उनमें |
| यन्त्रस्य | = | मशीन का |
| एकैकः | = | प्रत्येक / सभी |
| खण्डः | = | टुकड़ा / भाग |

## व्याकरणम्

**निम्नलिखित व्युत्पन्न अव्यय पदों का बहुधा प्रयोग होता है। इन्हें जानना आवश्यक है :**

| | | |
|---|---|---|
| अत्र | = | यहाँ |
| कुत्र | = | कहाँ |
| तत्र | = | वहाँ |
| यत्र | = | जहाँ |
| सर्वत्र | = | सभी जगह |
| एकत्र | = | एक जगह |
| अन्यत्र | = | दूसरी जगह |
| यदा | = | जब |

| | | |
|---|---|---|
| कदा | = | कब |
| तदा | = | तब |
| सदा | = | हमेशा |
| एकदा | = | एक बार |
| सर्वदा | = | हमेशा |
| इतः | = | यहाँ से |
| कुतः | = | कहाँ से, क्यों |
| यतः | = | जहाँ से |
| सर्वतः | = | सभी जगह से |
| विद्यालयतः | = | स्कूल से |
| गृहतः | = | घर से |

## अभ्यासः

### मौखिकः

1. उच्चारण करें :–

| | | | |
|---|---|---|---|
| (क) | मनुष्यस्य | मनुष्ययोः | मनुष्याणाम् |
| | जनस्य | जनयोः | जनानाम् |
| | भवनस्य | भवनयोः | भवनानाम् |
| | उत्सवस्य | उत्सवयोः | उत्सवानाम् |
| | यन्त्रस्य | यन्त्रयोः | यन्त्राणाम् |
| (ख) | बालके | बालकयोः | बालकेषु |
| | देशे | देशयोः | देशेषु |
| | अवसरे | अवसरयोः | अवसरेषु |
| | समाजे | समाजयोः | समाजेषु |
| | दिवसे | दिवसयोः | दिवसेषु |

## लिखितः

**2. कोष्ठ में दिये गये शब्दों में षष्ठी विभक्ति का रूप देकर रिक्त स्थानों को भरें :–**

यथा– रामः दशरथस्य पुत्रः आसीत्। (दशरथ)

(क) पाटलिपुत्रं ...................... राजधानी अस्ति। (बिहार)

(ख) डाक्टर राजेन्द्रप्रसादः ................. प्रथमः राष्ट्रपतिः आसीत्। (भारत)

(ग) सीता .................... पत्नी आसीत्। (राम)

(घ) अहं ..................... छात्रः अस्मि। (षष्ठवर्ग)

(ङ) ....................... जलं क्षारं भवति। (समुद्र)

(च) .................... उत्तरदिशायां हिमालयः अस्ति। (भारत)

**3. सुमेलित करें :–**

| | | | |
|---|---|---|---|
| (i) | कुम्भकारः | (क) | पाकं करोति। |
| (ii) | स्वर्णकारः | (ख) | पादत्राणं रचयति। |
| (iii) | रजकः | (ग) | काष्ठसामग्रीं निर्माति। |
| (iv) | चर्मकारः | (घ) | छात्रान् पाठयति। |
| (v) | काष्ठकारः | (ङ) | अलंकारं रचयति। |
| (vi) | पाचकः | (च) | कुम्भं करोति। |
| (vii) | शिक्षकः | (छ) | वस्त्रं प्रक्षालयति। |

**4. मंजूषा में से सही शब्द चुनकर रिक्त स्थानों को भरें :–**

**प्रणमन्ति, विकसन्ति, अस्ति, सन्ति, गुञ्जन्ति, पठामः, पाठयन्ति**

(क) अयम् अस्माकं विद्यालयः .................।

(ख) वयं विद्यालये ..................।

(ग) विद्यालये सप्त शिक्षकाः ............।

(घ) ते अस्मान् ......................।

(ङ) सर्वे विद्यार्थिनः अध्यापकान् ......................।

(च) उद्याने विविधानि पुष्पाणि ......................।

(छ) पुष्पेषु भ्रमराः .........................।

5. निम्नांकित शब्दों का वर्ण-विच्छेद करें :-

यथा **विद्यार्थी** = व् + इ + द् + य् + आ + र् + थ् + ई

विद्यालयः =

श्रवणम् =

दृश्यम् =

शिक्षकः =

महोत्सवः =

6. निम्नलिखित विषयों पर हिन्दी में पाँच-पाँच वाक्य लिखें :-

ईद, होली, क्रिसमस ।

7. संस्कृते प्रश्नानाम् उत्तराणि लिखत :-

(क) मनुष्यः कीदृशः प्राणी अस्ति ?

(ख) कं विना जीवनं कठिनं भवति ?

(ग) अस्माकं देशस्य किं नाम अस्ति ?

(घ) भारतं प्रबलं राष्ट्रं कथं भवेत् ?

✦✦✦